National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 129-131
© 2025 NJHSR
www.sanskritarticle.com

शुचिस्मिता साहुः
शोधछात्री,
राष्ट्रिय संस्कृत विश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः,५१७५०७

Correspondence:
शुचिस्मिता साहुः
शोधछात्री,
राष्ट्रिय संस्कृत विश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः,५१७५०७

# श्रीहरिनारायणदीक्षितविरचितस्य श्रीग्वल्लदेवचरितमहाकाव्ये महाकाव्यलक्षणसमन्वयः

शुचिस्मिता साहुः

**प्रस्तावना -**

कवयति वर्णयति वा इति कविः ।कविशब्दः "कृ" तथा "कवृ वर्णने धातोः" निष्पद्यते। कौति इति कविः। अर्थात् यः काव्यं रचयति सः कविपदवाच्यं भवति । आचार्येण स्वस्य काव्यमीमांसाग्रन्थे विषयः, अवस्था, काव्योपासना, मौलिकता दृष्ट्या कवेः भेदः निरूपितम् । तस्य मतेन कविः द्विविधः – काव्यकविः, शास्त्रकविश्च। शास्त्रकविः काव्ये रससंपादनं कृत्वा स्वादं योजयति तथा च काव्यकविः वाक्यविचित्रतायाः माध्यमेन कठोरशब्दान् सद्वचनरूपेण परिणमयति। कवेः अलौकिकं कर्म भवति काव्यम्। साहित्यसृजनक्षेने यदा हृदयस्य भावात्मकतन्त्रिका मानसिकचेतनया सह मिलित्वा अभिव्यक्तेः नूतनानि द्वाराणि उद्घाटयति तदा अनेकविधानि विविधवर्णविशिष्टानि पुष्पाणि प्रफुल्लितानि भवन्ति ।काव्यं साहित्योद्यानस्य एतादृशम् एकं विशेषपुष्पं भवति यत् वर्तमानयुगे प्रभावशालिरूपेण साहित्य-परम्परायां नूतनं संदर्भं प्रदातुं सफलं भवति। भाषाभावयोः औचित्यपूर्णं संयोजनं भवति काव्यम् ।मानवजीवने नैतिकतायाः आश्रयस्थानं भवति काव्यम्। प्राचीनकालादेव काव्यं भवति एकमात्रं गुरूत्वपूर्णं साधनम् ।

**काव्यस्य विभागीकरणम् -**

प्राचीनालङ्कारिकाणां मतेन काव्यं भवति द्विविधम् ।दृश्यकाव्यम् श्रव्यकाव्यश्चेति। दृश्यकाव्यस्य भेदद्वयं वर्त्तते रूपकम् उपरूपकञ्चेति । श्रव्यकाव्यस्य भेदत्रयः प्राप्यन्ते। यथा - गद्यकाव्यम्, पद्यकाव्यम्, चम्पूकाव्यश्च। कथा आख्यायिका भेदेन गद्यकाव्यं पुनः द्विविधम् ।पद्यकाव्यस्य भेदत्वेन महाकाव्यं, खण्डकाव्यम् इति द्विविधम्।

**महाकाव्यस्य स्वरूपम् -**

भाषाशास्त्रीयः दृष्ट्या महाकाव्यशब्दः महत्, काव्यं चेति शब्दयोः संयोगात् निष्पन्नः। प्रयमशब्दः महत् विशेषणम्, काव्यं विशेष्य इति। अतः महाकाव्यस्य शाव्दिकः अर्थः भवति महता प्रकारेण यत्र काव्यस्य उत्कृष्टं विशालञ्च रूपं स्पष्टं भवति तत्र महाकाव्यं वक्तुं शक्यते। रामायण- महाभारतादयः महाकाव्यस्याधाराः इति रामायणभारतौ लिखितमस्ति। महाभारते तु महत् इति विशेषणं संयुज्यते, रामायणे अपि महत्काव्यम् इति संज्ञा दत्तमस्ति। लवकुशौ रामकथां श्रुत्वा अनन्तरं श्रीरामचन्द्रं पृष्टवन्तौ!-

**किं प्रमाणमिदं काव्यं का प्रतिष्ठा महात्मनः।**
**कर्त्ता काव्यस्य महतः क्व यासौ मुनिः पुङ्गवः।।**

अस्मात् श्लोकात् स्पष्टतया दृश्यते यत् कस्यचित् विशिष्टव्यक्तेः जीवनवृतान्तः स्वभाविकतया महाकाव्येन व्यापकरूपेण वर्णयितुं वा चित्रयितुं शक्यते।

**महाकाव्यलक्षणसमन्वयः -**

विविधाः पण्डिताः स्वमत्यानुसारे भिन्नाभिन्नमहाकाव्यलक्षणम् लिखितवन्तः। अपि तु विशेषतया साहित्यदर्पणाकारविश्वनाथकृतसाहित्यदर्पणे उल्लिखितं महाकाव्यलक्षणं सर्वैः आद्रियन्ते। महाकाव्यस्य

लक्षणसमन्वये विविधानां विषयाणां चर्चा विहितास्ति।

**सर्गबन्धो महाकाव्यम्**

सर्गवन्धो युक्तं भवति महाकाव्यम् एतत् विश्वनाथकविराजस्य अभिमतम् ।अर्थात् प्रत्यकग्रन्थेषु अध्यायाः भवन्ति, तस्य अध्यायस्य नामः महाकाव्ये सर्गः इति उच्यते। यदि किमपि काव्यं सर्गयुक्तम् अस्ति चेत् तर्हि तन्नामध्येयं महाकाव्यम् ।तत् लक्षणमनुसृत्यं महाकविहरिनारायणदीक्षितमहोदयः "श्रीग्वल्लदेवचरितमहाकाव्ये" सप्तविंशतिसर्गाः सन्निवेशिताः ।

**तत्रैको नायकः सुरः।**[i]

**सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।**

**एकवंशभवा भूपाः कुलजा बहवोऽपि वा।।**[ii]

अत्र महाकाव्यस्य नायकः कीदृशः भवेत् एतद्विषये लिखितमस्ति। नायकस्य कुलविषये यदि कथयामश्चेत् तर्हि महाकाव्ये नायकः उत्तमकुलसंम्भुतः भवेत्। सुरक्षत्रियोवंशोद्भवः नायकः इति पदवाच्यः। नायकधीरोदात्तगुणसंपन्नः भवेत्। धीरोदात्तनायकविषये साहित्यदर्पणाकारः अस्य ग्रन्थे धीरोदात्तनायकस्य लक्षणं लिखितवान्।

**अवित्कथनं क्षमावानातगम्भीरो महोत्सवः**

**स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः।।**[iii]

अस्मिन् महाकाव्ये नायकः भवति श्रीग्वल्लदेवः। सः भगवान् शिवस्यांशः, हालरायः पुत्रश्च।सः स्वभावेन धीरः , वीरः , क्षमाशीलः सर्वजनविदितमेव श्रीग्वल्लदेवः क्षत्रियकुले हालरायस्य पुत्रत्वेन जन्म अलभत। सः शौर्य, दृढनिश्चयादिगुणैः संम्पन्नः आसीत्। महाकाव्ये एकवंशोद्भवानां राज्ञां वर्णनं भवितुं शक्नोति ।अस्मिन् महाकाव्ये तलराय-झालराय - हालराय - श्रीग्वल्लदेवादि राज्ञां वर्णनास्ति ।

**शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते।**

**अङ्गानि सर्वेऽपि रसाः, सर्वे नाटकसन्धयः ।।**[iv]

विश्वनाथमतेन काव्यं भवति "वाक्यं रसात्मक काव्यम्"। महाकाव्यलक्षणे स्पष्टतया उल्लिखितं यत् महाकाव्ये श्रृङ्गारवीरशान्तेषु कोऽपि एकः अङ्गीरसः भवेत्। एतत् विहाय हास्यरसादयः अन्यरसाः अङ्गरसत्वेन प्रयोगं कर्तुं शक्यन्ते। अपितु श्रीग्वल्लदेवचरितमहाकाव्ये हरिनारायणदीक्षितमहोदयेन अङ्गीरसत्वेन भक्तिरसः, अङ्गरसत्वेन शृङ्गार - भयानक – करुण - शान्त-अद्भुदादि रसानां प्रयोगः कृतः अस्ति।

नाटके पञ्चसन्धयः वर्तन्ते। यथा – मुखं, प्रतिमुखं, गर्भं, विमर्शः, निर्वहणश्च। सर्वेपि नाटकसन्धयः महाकाव्ये भवेयुः इति विश्वनाथस्य मतम् । अतः अत्र पञ्चसन्धिनां प्रयोगः परिलक्ष्यते। अस्मिन् महाकाव्ये चतुर्थसर्गतः षष्ठसर्गपर्यन्तं मुखसन्धिः, षष्ठसर्गे एकादशसर्गेश्च प्रतिमुखसन्धिः, दशमसर्गे गर्भसन्धिः, अष्टमसर्गे विमर्शसन्धिः, सप्तदशसर्गे निर्वहणसन्धिः प्रतीयते।

**इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ।**

**चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत् ।।**[v]

महाकाव्यस्य इतिवृतं ऐतिहासिकं, सज्जनाश्रयश्च भवतु इति विश्वनाथस्य मतम्। अस्य महाकाव्यस्य इतिवृत्तम् ऐतिहासिक तथा सत्यघटनाधारितम् ।सज्जनानां दिव्यचरितं समाजस्योपरि पर्यवेशितम्। अतः महाकाव्ये श्रीग्वल्लदेवस्य जीवनचरितविषये लिखितमस्ति।

चर्तुवर्गः अर्थात् - धर्मः, अर्थः, कामः, मोक्षश्च। एतेषु एकस्यालोचना अवश्यं भवेत्। विश्वनाथेन काव्यप्रयोजने एतत् विषये लिखितम् यथा –

**चर्तुवर्गफलप्राप्ति सुखादल्पधियामपि**

**काव्यादेव यतस्तेन तत्स्वरूपं निरुप्यते॥**[vi]

अस्मिन् महाकाव्ये कविना चर्तुवर्गेषु धर्मम् अत्यधिकं महत्वपूर्णम् इति प्रतिपादितम् ।

**आदौ नमष्क्रियाशीर्वा वस्तुनिर्देश एव वा ।**

**क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम् ।।**[vii]

न तु केवलं महाकाव्ये अपि तु संस्कृतकाव्ये मङ्गलाचरणस्य गुरुत्वपूर्णं भूमिका वर्तते। आर्शीवादात्मकः, नमस्कारात्मकः, वस्तुनिर्देशात्मकः इत्येतेभ्यः त्रिविधेभ्यः मङ्गलाचरणेभ्यः ग्रन्थकर्त्रा यथेच्छम् एकं मङ्गलाचरणम् ग्रन्थादौ करणीयम्। एतन्महाकाव्यस्य लक्षणम् अनुसृत्य मङ्गलाचरणे कविः स्वकाव्ये पार्वतीपुत्रगणेशः, देवादिदेवशङ्करः, सरस्वतीदेव्याः च स्तुतिं करोति।यथा-

**पूजनीयं सदादौ शुभे कर्म्मणि**

**सर्वविघ्नापहं सर्वदेवप्रियम् ।**

**भक्तसौख्यावहं शङ्करानन्ददं**

**पार्वतीनन्दनं श्रीगणेशं भजे ।।**[viii]

महाकाव्यस्य लक्षणानुसारं दुष्टस्वभावव्यक्तेः निन्दा साधुस्वभावव्यक्तेः गुणकीर्तनम् आवश्यकम्। प्रस्तुतमहाकाव्ये हालरायः, भाना इत्यादिनां सज्जनानां प्रशंसा तथा च डोटी - जटिया इत्यादिनां दुष्टस्वभावव्यक्तिनां निन्दा कृता अस्ति।

**ग्वल्लदेवानुभावेन**

**प्रजा एव न केवलाः।**

**सर्वेऽप्यपितु शास्तारोऽ**

**भूवन् सन्मार्गगामिनः।।**[ix]

**एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ।**

**नातिस्वल्पा नातिदीर्घाः सर्गाः अष्टाधिका इह ।।**[x]

महाकाव्यस्य लक्षणानुसारं सर्गस्यारम्भे एकं वृत्तं, सर्गस्यान्ते अन्यत् छन्दं प्रयुक्तं भवेत्। तद्विधिमनुसृत्य महाकाव्ये अपि एषा परम्परा अनुसृताः ।प्रत्येकसर्गः एकस्मिन्नेव वृत्तेन रचितम् भवेत्।परन्तु सर्गस्य अन्तिमश्लोके छन्दसः परिवर्त्तनं भवेत्। प्रथमसर्गे कविना आदौ स्रग्विणीछन्दसः प्रयोगः कृतः, सर्गान्ते मालिनीछन्दसः प्रयोगः कृतः ।द्वितीयसर्गस्य तृतीयसर्गेस्य आदौ अनुष्टुप् छन्दः अन्ते वसन्ततिलका छन्दसः प्रयोगः विहितः। एवमेव क्रमशः प्रतिसर्गस्य आदौअन्तेच धन्दसां प्रयोगःवर्तते। चतुर्थसर्गे उपजातिः, मालिनी, पञ्चमसर्गे

उपजातिः, शार्दुलविक्रिडितम्, षष्ठसर्गे अनुष्टुप्, मालिनी, सप्तमसर्गे स्रग्विणी, शार्दुलविक्रिडितम्, अष्टमसर्गे उपजातिः, शार्दुलविक्रिडितम्, नवमसर्गे अनुष्टुप्, वसन्ततिलका, दशमसर्गे उपजातिः, वसन्ततिलका, एकादशसर्गे उपजातिः, वसन्ततिलका, द्वादशसर्गे उपजातिः, वसन्ततिलका, त्रयोदशसर्गे अनुष्टुप्, मन्दाक्रान्ता, चतुर्दशसर्गे अनुष्टुप्, मालिनी, पञ्चदशसर्गे अनुष्टुप्, वसन्ततिलका, षोडशसर्गे उपजातिः, मन्दाक्रान्ता, सप्तदशसर्गे अनुष्टुप्, मालिनी, अष्टादशसर्गे उपजातिः, शार्दुलविक्रिडितम्, उनविंशतिविंशतिएकविंशतिसर्गेषु उपजातिः, शार्दुलविक्रीडितम्, द्वाविंशतिसर्गे अनुष्टुप्, वसन्ततिलका, त्रयोविंश-तिसर्गे अनुष्टुप्, वसन्ततिलका, चतुर्विंशतिसर्गे अनुष्टुप्, शार्दुलवि-क्रीडितम्,पञ्चविंशतिसर्गे इन्द्रवज्रा, वसन्ततिलका, षट्विंशतिसर्गे अनुष्टुप्, वसन्ततिलका, सप्तविंशतिसर्गे अनुष्टुप्, शार्दुलविक्रिडितम् छन्दसां कविना प्रयोगः कृतः।

विश्वनाथमतेन महाकाव्ये न्युनातिन्युनम् अष्टसर्गाः भवेयु। सर्गाः तातिस्वल्पाः, नातिदीर्घाश्च भवन्ति। एतन्मतम् अङ्गीकृत्य हरिनारायणदीक्षितमहाभागेन सप्तविंशति- सर्गाः अस्मिन् काव्ये सन्निवेशिताः।

**नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ।**
**सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।।**[xi]

कुत्रचित् सर्गमध्ये नानावृत्तस्य प्रयोगः दृश्यते। अस्मिन् महाकाव्ये पञ्चदशसर्गे प्रथमतः इन्द्रवज्रा छन्दसः प्रयोगः तदनन्तरम् उपजातेः, वसन्ततिलकादिनां छन्दसां प्रयोगः दृश्यते।

विश्वनाथकविराजमतेन प्रत्येकऽस्मिन् सर्गान्ते अग्रिमसर्गस्य कथावस्तुनः चर्चा आवश्यकी।अत्र तु कविः तं विधिं नानुसृतवान्।

**सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः।**
**प्रातर्मध्याह्नमृगयाशैलर्तु वनसागराः।।**
**सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः।**
**रणप्रयाणोपयममन्त्रपुत्रोदयादयः।।**
**वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह।**[xii]

लक्षणानुसारं काव्यस्य सौन्दर्यवर्धनार्थं सन्ध्या – सूर्य - चन्द्र - रजनी – प्रदोष - ध्वान्त - वासर- प्रात – मध्याह्न - मृगया – शैल – ऋतु – वन - सागरस्य वर्णनामपेक्षते।इतोऽपि सम्भोग – विप्रलम्व – मुनि – स्वर्ग – पुर – अध्वर – रण – प्रयाण – मन्त्र – पुत्रादिनाम् अपि वर्णनं स्युः।एतल्लक्षणमपि महाकाव्ये वर्त्तते।

**कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।।**[xiii]
**नामास्य सर्गोपादेयकथया सर्गनाम तु।**

काव्ये वर्णितविषयवस्तुनः आधारेण महाकाव्यस्य नामकरणं कवेः नामाधारितं, नोचेत् नायकनामानुसारं भवेत्। अत्र नायकस्य नाम श्रीग्वल्लः। अतः महाकाव्यस्य नामकरणं नायकाधारेण "श्रीग्वल्ल-देवचरितम्" इति।

सर्गस्य नामकरणं तत्र वर्णितविषयवस्तुनः आधारेण भवितव्यम्। क्रमशः मङ्गलाचरणात्मकः, कुर्माञ्चलवर्णनात्मकः, सन्तानाभावदुःखवर्णनात्मकः, पुत्रप्राप्त्युपायवर्णनात्मकः, श्रीविभाण्डेश्वरार्चनात्मकः, अभिष्टपत्नीलाभवर्णनात्मकः, गर्भागमनवर्णनात्मकः, सपत्नीइर्षावर्ण-नात्मकः, सपत्नीकपटवर्णनात्मकः, श्रीग्वल्लदेवजन्मवर्णनात्मकः, वाल्य- वर्णनात्मकः, सम्बन्धवोधनात्मकः, ग्वल्लप्रत्यागमनात्मकः, विमातृ-मिलनवर्णनात्मकः, सपत्नीपश्चातापवर्णनात्मकः, कलिकाशा-जागरणवर्णनात्मकः, मातृपितृमिलनवर्णनात्मकः, यौवराज्याभिषेक-वर्णनात्मकः, विमातृवियोगवर्णनात्मकः, पितृवियोगवर्णनात्मकः, अभीष्टशासनविधि वर्णनात्मकः, राज्यनिरीक्षणवर्णनात्मकः, चम्पा-वतराज्यलाभ वर्णनात्मकः, प्रजानांसुखसमृद्धि वर्णनात्मकः, देहत्या-गवर्णनात्मकः, लोकदेवत्वलाभवर्णनात्मकः, माहात्म्य-वर्णनात्मकः।

एवमेव श्रीहरिनारायणदीक्षितमहोदयेन साहित्यदर्पणाकारलिखितं महाकाव्यलक्षणमनुसृत्यं श्रीग्वल्लदेवचरितमहाकाव्यं विरचितम्। अतः काव्यमिदम् उत्तमं महाकाव्यम् इति संशय नास्ति।

**सन्दर्भग्रन्थसूची -**


१. संस्कृत साहित्य इतिहास,आचार्य बलदेव उपाध्यायः, शारदा प्रकाशनम्

२. साहित्यदर्पणः, प्रो.सूर्यमणि रथः, सांविदीप्रकाशनम्, पुरी, २०१७

३. श्रीग्वल्लदेवचरितमहाकाव्यम्, ड़ा.हरिनारायण दीक्षितः, ईस्टर्न बुक लिंकर्स, २००८

४. संस्कृतसाहित्य का समग्र इतिहास, राधावल्लभ त्रिपाठी, चौखम्बा सुरभारती प्रकाशनम्, २०२०


**पादटीका-**

[i] साहित्यदर्पणः-६/३१५
[ii] साहित्यदर्पणः६/३१६
[iii] साहित्यदर्पणः-३/३२
[iv] साहित्यदर्पणः ६/३१७
[v] साहित्यदर्पणः६/३१८
[vi] साहित्यदर्पणः-१/२
[vii] साहित्यदर्पणः६/३१९
[viii] श्रीग्वल्लदेवचरितमहाकाव्यम्१/१
[ix] श्रीग्वल्लदेवचरितमहाकाव्यम्१२/३९
[x] साहित्यदर्पणः-६/३२०
[xi] साहित्यदर्पणः-६/३२१
[xii] साहित्यदर्पणः-६/३२२-३२३
[xiii] साहित्यदर्पणः-६/३२४